# चतुर्दशः पाठः
# पितामही मिलिता

प्रस्तुता कथा आधुनिकसंस्कृतसाहित्यस्य सुप्रसिद्धेन साहित्यकारेण आचार्यनारायणशास्त्रीमहोदयेन विरचिता। अर्वाचीनसाहित्ये विभिन्नभाषाणां विविधाः विधाः अपि संस्कृते गृहीताः। लघुकथाभिः सह दीर्घकथानां प्रणयनम् अपि विशंतितमे ख्रिस्ताब्दे पर्याप्तमात्रायामभवत्। आसु कथासु सहजप्रवाहमयभाषायाः, भावानां च समावेशः तु भवत्येव, समाजस्य कृते सन्देशः अपि भवति। आचार्य नारायणशास्त्रीकांकरमहोदयस्य कथासु अपि समाजोपयोगीविषयाणां सुष्ठु लेखनं दृश्यते।

प्रस्तुता कथा आधुनिकसमाजस्य, परिवारस्य च महतीं समस्याम् प्रति सङ्केतं करोति। पुरा संयुक्ते परिवारे आबालवृद्धानां सर्वेषां सदस्यानां महत्त्वं भवति स्म, किन्तु परिवारस्य विघटित्वात् बालानां वृद्धानां च स्थितिः परिवर्तिता। विशेषतः अर्थार्जने संलग्नौ पतिः-पत्न्यौ बालान् वृद्धान् च सम्यक् रूपेण पालयितुम् न शक्नुतः, तदा वृद्धानां कृते वृद्धाश्रमाणां परम्परा प्रारब्धा। किन्तु वृद्धाश्रमेषु निवसन्तः वृद्धाः स्वोपेक्षया अपमानं अनुभवन्ति। अस्याम् कथायाम् अपि एषा एव पीडा वर्णिता। पुत्रः त्रिलोचनः पुत्रवधुः इन्दुमती च शकुन्तलां वृद्धाश्रमे नयतः, तत्र परित्यजतः। किन्तु स्वत्रिचतुर्वर्षीयस्य पुत्रस्य कृते (यः स्व पितामहीम् अतीव स्मरति) तौ स्वमातारम् वृद्धाश्रमात् आनयतः। सत्यं एव वृद्धजनाः स्नेहात्, समयात् परं अन्यं किमपि नेच्छन्ति।

## पितामही मिलिता

पितरि दिवं गते माता स्वपुत्रं त्रिलोचनं येन केन प्रकारेण आर्थिक-कष्टानि सहित्वा अपि पालितवती, पोषितवती, वर्धितवती च। तं पाठयित्वा, लेखयित्वा विद्वांसं निर्मातुं सा कामपि न्यूनतां न अरक्षत्। शिक्षकाः अपि आत्मीयं सर्वम् अपि ज्ञानं तस्मिन् सत्पात्रे निहितवन्तः। सत्यम् एव एकः विनय-सम्पन्नः सदाचारी शिष्यः गुरुं सर्वथा प्रसन्नं कृत्वा दुर्लभाम् अपि विद्यां सुलभते। विवाह-योग्याम् अवस्थां प्राप्तवता तेन सह स्वात्मजायाः विवाहं कर्तुम् इच्छुकाः अनेके सम्पन्नाः जनाः उपस्थिताः। सा प्रतिवेशिनः ग्रामस्य पटवारिणः कन्यां स्वपुत्रवधूं निर्माय गृहम् आनीतवती।


अधुना गृहे त्रयः प्राणिनः आसन्- एका सा स्वयं, द्वितीयः पुत्रः त्रिलोचनः, तृतीया इन्दुमती पुत्रवधुः च। त्रिलोचनस्य वैदुष्येण सन्तुष्टः शिक्षाविभागः तस्मै स्वकीये एव ग्रामे बालकबालिकान् शिक्षयितुं विद्यालये शिक्षकपदे नियुक्तिं दत्तवान्। पुत्रवधुः अपि स्वगृहे एव बालिकाभ्यः जीवनोपयोगि-कलानां शिक्षणं दातुं प्रारब्धवती। पुत्रवधूः शनैः शनैः बालिकानां माध्यमेन तासां सम्बन्धिनीषु प्रौढ-गृहमहिलासु शिक्षां प्रति रुचिं जागरितवती। ताः महिलाः अपि स्वबालिकाभिः सह तत्र एव उपस्थिताः भूत्वा पठन-लेखन-शिक्षां प्राप्तुं

प्रवृत्ता:। केषुचित् एव वर्षेषु सर्व: एव ग्राम: स्त्रीशिक्षाया: सम्बन्धे समृद्ध: सञ्जात:। विदुषी इन्दुमती अधुना एका आदर्श-शिक्षिका मन्यते स्म। राज्यसर्वकारेण अपि सा शिक्षक-दिवसे सम्मानिता आसीत्। एवं पुत्रस्य त्रिलोचनस्य, पुत्रवध्वा: इन्दुमत्या: च यशश्वित्तया, समृद्धिमत्तया च मातु: शकुन्तलाया: चित्तम् अति प्रसन्नम् आसीत्। इदानीं तस्या: एक एव कामना अवशिष्टा यत् सा पौत्रमुखं दृष्ट्वा एव दिवं गच्छेत्। एतदर्थं सा प्रतिदिनं प्रात: जलाभिषेकं कुर्वन्ती उमाशंकरं प्रार्थयते स्म। तस्या: प्रार्थना सफला जाता। यथासमयं इन्दुमती एकं सुन्दरं शिशुं प्रसूतवती। तदीयं मुखचन्द्रं विलोकयन्त्या: पितामह्या: शकुन्तलाया: मन: तृप्यति स्म एव न।

यथा हि सर्वेषु परिवारेषु भवति, शिशो: लालन-पालनयो: रतायै इन्दुमत्यै श्वश्रूसेवां कर्तुं पर्याप्त: समय: न मिलति स्म। जानति अपि वृद्धावस्थां प्राप्ता शकुन्तला स्वकीयान् रोषमयान् उद्गारान् प्रकटयति स्म एव। किन्तु अस्मिन् आत्मकृत्ये सा अवश्यं पश्चात्तपति स्म। श्वश्र्वा: कटु-व्यवहारं इन्दुमती भर्तु: त्रिलोचनस्य अपि सम्मुखे प्रबोधितवान्। किन्तु यदा अनेन समस्याया: समाधानं न अभवत् तदा स: अपि चिन्तित: स्थातुं प्रवृत्त:।

एकस्मिन् दिने इन्दुमती भर्तारं त्रिलोचनम् उपायं दर्शितवती, यद् अधुना वृद्धाश्रमे एव मातरं प्रापय्य निश्चिन्तताया: अनुभव: क्रियेत्। अनेन तत्र स्वसमवयस्काभि: सह माता अपि सुखिनी स्थास्यति, वयम् अपि इह दु:खोन्मुक्ता: भविष्याम:। त्रिलोचन: इन्दुमत्या: प्रस्तावेन तत्कालम् एव सहमत: अजायत। अवसरं दृष्ट्वा स: मातरं तदर्थम् अनुकूलाम् अपि कृतवान्।

त्रिलोचनं मातरं वृद्धाश्रमे प्रापय्य आगत:, किन्तु तस्य मन: नैव रमते स्म। यदि स: एकाकी अभविष्यत् तर्हि मातु: प्रत्येकम् इच्छां पूरयित्वा तां प्रसन्नाम् अरक्षिष्यत्, किन्तु पत्न्या: अपि मन: तेन रक्षणीयम् आसीत् एव।



इदानीं तयोः आत्मजः त्रिचतुर-वर्षात्मकः जातः आसीत्। पितुः मातुः उपस्थितौ अपि सः पितामहीम् एव विशेषरूपेण इच्छति स्म। अतः यदा बालकः स्वकीयां पितामहीं गृहे न दृष्टवान्, तदा सः दुःखी भूत्वा बहु-बहु रुदितवान्। सः न किंचित् अखादत्, न किंचित् अपिबत्। निरन्तरं तस्य मुखे 'पितामहि ! पितामहि ! इदम् एव रटनम् आसीत्। रुदतः रुदतः तस्य कण्ठः शुष्यति स्म।

आत्मजस्य एतां दुरवस्थां द्रष्टुम् असमर्थो दम्पती अन्ते वृद्धां वृद्धाश्रमतः आनेतुं निश्चयं कृतवन्तौ एव। तत्र ताभ्यां सह गतः बालकः पर्यपृच्छत् च- पितामहि ! त्वं मां त्यक्त्वा किमर्थम् अत्र आगतवती ? चल गृहं चल, दम्पती अपि तस्य एव कथनं समर्थितवन्तौ। अन्ये वृद्धाश्रमवासिनः चिन्तयन्ति स्म यत् अस्मान् अपि नेतुं गृहतः कश्चित् आगच्छेत् इति।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **पाठयित्वा** | – | पाठनं कृत्वा (पठ् +णिच् + क्त्वा)। |
| **स्वात्मजायाः** | – | स्वकीयां आत्मजा (पुत्री) तस्याः। |
| **प्रतिवेशिनः** | – | प्रतिवेशे वसन्ति ये (पडौसी)। |
| **जलाभिषेकम्** | – | शिवलिङ्गे जलसिंचनं इति। |
| **श्वश्रुः** | – | पत्युः माता (सास)। |
| **भर्तारम्** | – | पतिं (भर्तृ शब्द, द्वितीया एकवचन)। |
| **स्वसमवयस्काभिः** | – | समानायुः अस्ति यासां ताभिः। |
| **दुखोन्मुक्ताः** | – | दुखेभ्यः उन्मुक्ताः। |
| **पितामहीम्** | – | पितुः माता (दादी) तम्। |
| **रटनम्** | – | पुनः पुनः उच्चारणम्। |
| **सोपालम्भम्** | – | उपालम्भ सहितं (उलाहने के साथ)। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. त्रिलोचनस्य मातुः किं नाम आसीत् ?

(क) पार्वती (ख) सीता

(ग) शकुन्तला (घ) इन्दुमतिः ( )

२. त्रिलोचनस्य विवाहः कया सह अभवत् ?

(क) चन्द्रमत्या (ख) इन्दुमत्या
(ग) बुद्धिमत्या (घ) सिद्धमत्या ( )

३. इन्दुमतिः केन सम्मानिता ?

(क) राज्यसर्वकारेण (ख) ग्रामपंचायतेन
(ग) शिक्षाविभागेन (घ) केन्द्रसर्वकारेण ( )

४. त्रिलोचनस्य श्वसुरः कस्यां सेवायाम् आसीत् ?

(क) पटवारः (ख) सरपंचः
(ग) शिक्षकः (घ) न कोऽपि ( )

## अतिलघूत्तरात्मक-प्रश्नाः –

१. त्रिलोचनः कुत्र नियुक्तिम् अप्राप्नोत् ?
२. इन्दुमतिः बालिकानां कृते किं प्रारब्धवती ?
३. इन्दुमति ग्रामस्य प्रौढमहिलानां कृते किं कर्तुं प्रवृत्ताः ?
४. त्रिलोचनस्य पुत्रस्य आयुः कति आसीत् ?

## लघूत्तरात्मक प्रश्नाः –

१. शकुन्तलायाः परम् इच्छा का आसीत् ?
२. कामना पूर्त्यर्थं सा किं करोति स्म ?
३. इन्दुमत्या स्वश्वश्रुः वृद्धाश्रमे किमर्थं प्रेषिता ?
४. पितामहीं न दृष्ट्वा पौत्रस्य अवस्था कीदृशी आसीत् ?
५. पुत्रस्य दुरावस्थां दृष्ट्वा तौ किं कृतवन्तौ ?

## निबन्धात्मक प्रश्नाः –

१. वृद्धाश्रमवासिनः अन्ये जनाः शकुन्तलायाः परिवारं दृष्ट्वा किं अचिन्तयन् ? तेषां भावानां वर्णनं कुरुत।
२. अस्याः कथायाः सारं सन्देशं च लिखत।
३. अस्माकं व्यवहारः वृद्धजनान् प्रति कीदृशः भवितव्यः इमं विषयं अधिकृत्य एकं निबन्धं लिखत।

## व्याकरणात्मक-प्रश्नाः–

१. **अधोनिर्दिष्टानां सन्धि-पदानां नामनिर्देशपूर्वकः विच्छेदः विधेयः–**

| | पदम् | – | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | जलाभिषेकम् | – | ............................... | ........................ |
| (ख) | दुःखोन्मुक्ताः | – | ............................... | ........................ |
| (ग) | सोपालम्भः | – | ............................... | ........................ |
| (घ) | स्वात्मजायाः | – | ............................... | ........................ |
| (ङ) | वृद्धावस्थाः | – | ............................... | ........................ |

२. **अधोलिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः–**

| | सन्धिपदम् | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | स्व + आत्मीयेभ्यः | – | .......................... | .......................... |
| (ख) | दुः + चित्तया | – | .......................... | .......................... |
| (ग) | सत् + आचारी | – | .......................... | .......................... |
| (घ) | जीवन + उपयोगी | – | .......................... | .......................... |
| (ङ) | प्रति + एकम् | – | .......................... | .......................... |

३. **अधोलिखितानां पदानां नामनिर्देशपूर्वक-विग्रहो विधेयः–**

| | पदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | मनोगतं | | |
| (ख) | शिक्षकपदे | | |
| (ग) | जीवनोपयोगी | | |
| (घ) | पुत्रवधुः | | |
| (ड.) | असमर्थः | | |

४. **अधोलिखितानां पदानां प्रकृति-प्रत्ययविवेचनं कुरुत।**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | पाठयित्वा | ............................ | ........................ |
| (ख) | शिक्षयितुम् | ............................ | ........................ |
| (ग) | दृष्ट्वा | ............................ | ........................ |

| | | | |
|---|---|---|---|
| (घ) | पालितवती | .......................... | ...................... |
| (ङ) | आरूढः | .......................... | ...................... |
| (च) | आनेतुम् | .......................... | ...................... |
| (छ) | रक्षणीय | .......................... | ...................... |
| (ज) | प्रबोधितवान् | .......................... | ...................... |

५. **अधोनिर्दिष्टेषु पदेषु विभक्ति-वचन-निर्देशं कुरुत-**

| | **पदम्** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| (क) | प्रतिवेशिनः | .......................... | ...................... |
| (ख) | जलाभिषेकम् | .......................... | ...................... |
| (ग) | त्रिलोचनम् | .......................... | ...................... |
| (घ) | विदुषी | .......................... | ...................... |
| (ड) | भर्तुः | .......................... | ...................... |
| (च) | प्रेम्णा | .......................... | ...................... |

६. **निम्नलिखितानां पदानां धातु-लकारः-पुरुषः-वचनं च निर्दिश्यत–**

| | **पदम्** | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|---|
| (क) | जीविष्यामि | ................ | ................. | ................ | ............ |
| (ख) | आगच्छेत् | ................ | ................. | ................ | ............ |
| (ग) | विस्मरति | ................ | ................. | ................ | ............ |
| (घ) | प्रार्थयते | ................ | ................. | ................ | ............ |
| (ड.) | आसीत् | ................ | ................. | ................ | ............ |

## उत्तरमाला

वस्तुनिष्ठात्मक प्रश्नाः – १. ग  २. ख  ३. क  ४. क

❀ ❀ ❀